N. A.
N. A.
Sanskrit
Handwritten on paper
N. A.
Folios: 13
11.5" x 5"
Complete

श्रीगणेशाय नमः॥ अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घट एव प्रसिद्ध इति व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वा
दिति चिंतामणिग्रंथे समवायित्वमपहाय घटत्वेन वाच्यत्वाभावो कुतो नोक्त इति चेच्छृणु॥ समवायित्वं न वाच्यत्वे इति बोधनार्थ
मेव तथोक्तः॥ ननु एवकारस्य अन्ययोगव्यवच्छेदार्थकतया घट एव प्रसिद्ध इत्यनेन पटादौ तदभावो नास्तीति बुध्यते तन्न संदर्भसंदं
व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वादित्यनेन केवलान्वयित्वबोधनादिति चेन्न॥ घट एव प्रसिद्ध इत्यनेन पटेपि
प्रसिद्ध इत्यर्थकरणे न दोषादिति॥ ननु पूर्वोक्तव्याप्तौ अभावप्रसिद्धिनिबंधनाव्याप्तिर्दत्ता अधुना समवायितयेत्यादिग्रंथेनाभा
वस्य प्रसिद्धिः कृता तथापि व्याप्तिप्रसिद्धिस्तु नास्त्येवेति॥ न चैवं घट एव व्यभिचारः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव
वद्वृत्तित्वमिति ग्रंथेन व्यभिचाराभावो दर्शितः तथा च व्याप्तिरसिद्धेति ध्वनितं॥ तदपि न सम्यक् व्यभिचाराभावव[illegible]सेरपि
असत्त्वादिति चेन्न॥ कूटघटितव्याप्तौ अभावाप्रसिद्धिः पूर्वग्रंथेन कृता॥ न चैवं घट एवेत्यादिग्रंथेन तत्र त्वप्रदर्शनपरत्व
व्यभिचाराधीनी रोधे विषयः सत्त्वव्याप्तिरित्यत आह॥ सामानाधिकरण्येति तथा चाप्रसिद्धिदोषं परित्यज्य प्रतियोग्यवृत्ति
श्चेत्यादिदोषांतरानुधावनं व्यर्थमिवाच्यं॥ अथेदं वाच्यं ज्ञेयत्वादिपारिभाषिकाव्याप्ति अभिप्रायेणैव च अस्तु तथा च अप्रसि
द्धिर्नास्तीति भावः॥ ननु अव्यभिचारधी विरोधिविषयत्वं व्याप्तित्वं तादृशव्याप्तिज्ञानस्य साध्यतावच्छेदकावच्छिन्नेत्या
दिव्यभिचारप्रतिबंधकत्वाभावात् कथं व्याप्तिरिति वाच्यं॥ मणिमंत्रादिन्यायेन तस्यापि प्रतिबंधकत्वादिति भावः॥ घटा
दिसमवायितयेत्यर्थः॥ इत्यपि आहुरिति शिरोमणिः॥ तन्नैवेति वाच्यत्वमित्यत्र तावपि घटादिसमवायित्वं न तत्समाना

धिकरणदृतिध्वनितम्॥अत्रद्वयोरित्यनेनास्वरसः॥तथाचसवयस्यैक्यमनेसमवायानुयोगित्वन्तुघटानुयोगिकसमवायानुयोगित्व
१ स्यापिइच्छायांसत्वात्समवायित्वमपिनव्यधिकरणदृतिपदार्थान्तरंवानतुइच्छमात्रं अतिप्रसक्तत्वात् घटेपटपदवाच्यतावाने
तिनत्तुघटपदजन्यबोधविषयत्वप्रकारतानिरूपितज्ञमदिच्छामात्रैवशक्तिरित्युक्तावपितादृशेच्छायामत्संबंधघटानु
योगिकविषयतैवतुचाच्चरनाद्दृशसंबंधेनपटेतदिच्छायाःअसत्वान्नातिप्रसक्तिरित्यंतत्राह पदार्थान्तरंवेति।केचित्तुभिमां
सकमतेईश्वराभ्युपगमाद्यदा पदार्थान्तरंवेति॥अत्रकेचित्तुआपत्तिः कथंचिद्धारणेपिवाच्यत्वमित्यत्रवाच्यधात्व
र्थइच्छारावत्वप्रत्ययार्थोविषयत्वमितिइच्छाविषयत्वलाभः।भवतुमतेप्रत्ययार्थस्यानिरर्थकत्वापत्तेरितिअने
नतन्मात्रेवाच्यत्वमितिभावः॥नचैसंकेतवचघत्वर्थइच्छारावत्वप्रत्ययार्थ आश्रयत्वंतथाचेच्छानात्रेतिलाभः
त्वप्रत्ययेनचेच्छामात्रंबुध्यते।तथाचेच्छमात्रमेववाच्यत्वमितिनिनदंगीकर्तुंअभिप्रायः॥समवाकारणतयेनिज
गदीशः॥इदमपिसमवायित्वस्यपारिभाषिकत्वंप्रसंगेणाप्रमेयवाचकत्वादित्यादौअभावप्रसिद्ध्यानुदारतमूलकस्यन्यूनते
रोनिषि तुकंलिमणिनातत्कथंसंगच्छते।तत्रापिसमवायितपावाच्यत्वाभावस्यैवपारिभाषिकव्याप्तौघटकतयान्यूनतायाःअस
त्वात्॥स्वप्रतियोगिसमानाधिकरणाः॥साध्यव्यापकतावच्छेदकप्रतियोगिताकायावंतोऽभावाः॥प्रतियोगिसमानाधिकरणास्तुत्वं
मितिशिरोमणिः॥यदितिअत्रयत्समानाधिकरणाद्यस्यपत्रकौसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगि १

तावत्स्यात्मत्वसामान्याभावस्य यावदंतर्गतत्वं तस्य च व्यापकताघटकसमवायसंबंधेन प्रतियोग्यधिकरणे आत्मनि केनापि संबं
धेन अवृत्तित्वात् अयमात्मा ज्ञानादित्यादावव्याप्तिः अत एव तादृशपदं इत्यस्य स्फुटीभविष्यति इति जगदीशः ॥ ॥ अयं समवायेन आ
त्मघटयोर्नात्मत्वमिति प्रतीत्या आत्मघटोभयत्वावच्छेदेन आत्मत्वसामान्याभावस्य प्रतियोगिसमानाधिकरणत्वसंभवाद
व्याप्त्यभिधानमसंगतं प्रतीतं च नादृशप्रतीत्या आत्मत्वस्यैवोभयनिरूपितवृत्तित्वाभावो विषयः ॥ ॥ ननु उभयत्वावच्छेदेन आत्मत्वा
भावः तथैतव्यासज्यविधानमिति वाच्यं ॥ ॥ न चाप्यात्मसामान्ययोर्नात्मत्वमिति प्रतीत्या आत्मसामान्योभयनिरूपितसमवा
यसंबंधावच्छिन्नवृत्तित्वाभावप्रसिद्ध्या तदभावस्य सिद्ध्यसंभवे उभयत्वावच्छेदेनैव आत्मत्वसामान्याभावसिद्धेर्नाव्याप्तिरेव
कान्तः इति चेत् ॥ ॥ अत्र केचित् ॥ अयं ग्रंथः ॥ ॥ व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकएकदेशवृत्तिधर्माभावानंगीक
र्तृमताभिप्रायकः ॥ ॥ अन्यथा धूमवान्वह्नेरित्यादावतिव्याप्तिः तावदंतर्गतस्यायोगोलकान्यत्वाभावस्यापि अयो
गोलकपर्वतौ नायोगोलकाविति प्रतीत्या पर्वतायोगोलकोभयत्वावच्छेदेन प्रतियोगिसामानाधिकरण्यात् ॥ ॥ न चाव्या
यंमात्मज्ञानादित्यादावव्याप्तिवारकतयैव तत्समानाधिकरणेति विशेषणं सार्थकमिति वदंति ॥ ॥ तच्चिंत्यं ॥ ॥ अयोगोलक
एव पर्वतायोगोलकोभयनिरूपिततादात्म्यसंबंधावच्छिन्नवृत्तित्वाभाववमाहितया प्रतीतौ उभयत्वावच्छेदेनायोगोलक
भेदावगाहित्वे मानाभावः न चायोगोलकान्यत्वाभावस्य हि त्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविर

१ – द्वैणनातिव्याप्तिसंभवः॥ न चोभयनिरूपितताद्रात्म्यसंबंधावच्छिन्नवृत्तित्वाभावप्रसिद्ध्या तदभाववमादित्वं न संभव
तीति वाच्यं॥ तत्र चास्त्यपि प्रतियोगिसमानाधिकरणेत्यत्र प्रतियोगितावच्छिन्नाधिकरणताव्यासज्यवृत्तिवृत्तिधर्मा
वच्छिन्नानुयोगिताकत्वेन विवक्षणान्नातिव्याप्तिः॥ अन्यैस्तु कालिकसंबंधेन घटाधिकरणतावच्छेदाभावस्य यत्वदंतर्ग
तस्य प्रतियोगिसामानाधिकरण्यविरहाद् व्याप्तिः॥ अतः तदुपादानं॥ न च तथापि आत्मघटयोर्न तादृशाधिकरणतावच्छेद
इति प्रतीत्या तदुभयत्वावच्छेदेन आत्मनि तादृशभेदसत्त्वात्तादृशाभावस्य आत्मन्येव प्रतियोगिसमानाधिकरणत्वादव्या
प्तिरिति वाच्यं॥ तादृशभेदे तदुभयनिरूपितस्वरूपसंबंधावच्छिन्नवृत्तित्वाभाववमादितत्वैव तादृशप्रतीत्युपपत्तेः
न च तादृशाभावस्य भावभिन्नत्वविरहेण न लक्षणघटकेति वाच्यं॥ रूपध्वंसवदन्यत्वाभावस्यैव रूपध्वंसस्वरूपस्य तथा
त्वसंभवात्॥ न च दिक्षि ज्ञाने च तादृशाभावस्य दिक्कृतविशेषणत्वविषयितान्यतरयं प्रतियोगिसमानाधिकरण्यान्नाव्याप्तिरि
ति वाच्यं॥ विषयित्वदिक्कृतविशेषणत्वकालिकान्यतमसंबंधेन तादृशध्वंसवदन्यत्वाभावमादाय तथात्वसंभवात्॥ न चैवं सति
तादृशान्यतमसंबंधेन प्रलयवदन्यत्वाभावमादाय वन्हिमान्धूमादित्यादौ अव्याप्तिसंभवे अप्रामाण्येत्यादि स्वरूपस्य नानुधावनम
संगतं॥ तस्य अव्याप्यवृत्तित्वेन प्रलयावच्छेदस्य काले असत्त्वेन सर्वदा काले तादृशभेदो नास्ति इति प्रत्ययापत्तेः॥ एवं च रूपध्वंसस्वरू
पतया तादृशान्यतमसंबंधेन रूपध्वंसवदन्यत्वाभावस्य स्वप्रतियोगिस्वरूपेण रूपध्वंसवदन्यत्वरूपप्रतियोगिरूपसमानाधिक

रणत्वान्नाव्याप्तिरिति वस्तुतस्तु गगनत्वप्रकारकप्रमाविशेष्यत्वाभावस्य तथाविधयावदंतर्गतस्य प्रतियोगिसामानाधिकरण्यविरहान्ना
व्याप्तिरिति वाच्यं ॥ तादृशप्रतीतेः तादृशा॥ न च तस्यापि अत्र घटयोर्न तादृशप्रमाविशेष्यत्वमिति प्रतीत्या तदुभयत्वावच्छे
देन प्रतियोगिसामानाधिकरण्यान्नाव्याप्तिरिति वाच्यं ॥ तादृ प्रतीतेः तादृशविषयत्वदाद्वोभयनिरूपितवृत्तित्वाभावावगाहित्वयो
पपत्तेरिति प्राहुः ॥ तन्न यद्यपि गगनाभावाभावस्यापि यावदंतर्गततया तस्य चावृत्तित्वेन प्रतियोगिसामानाधिकरण्यविरहेण
वा वह्निमान्धूमादित्यत्रा अव्याप्तिसंभवे अप्रमात्मत्वाद्यप्रसिद्धिस्थले पर्यंतानुधावनमसंमतं न च तस्य अभावभिन्नत्वविरहेण
लक्षणघटकत्वं कथंचिन्नयावेपि वृत्तिमत्त्वविरहेण न तादृशाभावव्युदाससंभव इति तत्र स्यैतानुधावनं ॥ तथास्त्वपि प्रक
माभावाभावमादाय अव्याप्तिसंभवात् तदित्युक्तं तथापि स्वविशिष्टे वाधिकरणावच्छेदेनेत्यादिकावनुक्तौ चोभयथापि तत्सा
ध्य इतु तत्स्थलपर्यंतानुधावनं वह्निसाध्यके तु स्वविशिष्टत्वाद्यकाले वतस्य सार्थक्यमिति ध्येयं ॥ न च हेतु समानाधिकरणा
इत्यपहायेत्यादि जगदीशः ॥ हेतुसमानाधिकरणेति कल्पे हेतुतावच्छेदकविशिष्टाभाव इति अत्राभावांतार्थः वैशिष्ट्यं च स्वाव
च्छिन्ननिरूपकतानिरूपिताधिकरणतावद्वृत्तित्वस्वकालीनसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वोभयसंबंधेनात्र
कालीनत्वस्य अधिकस्य प्रवेशे गौरवमिति न्यायप्रमन्दसत्वात् हेतु साध्यसमानाधिकरणेति ॥ साध्यतावच्छेदक
विशिष्टभाव इति तदर्थः वैशिष्ट्यं च स्वावच्छिन्नसामानाधिकरण्य स्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वोभयसंबं

३ धेनात्रकाव्यक्तीनत्वानिवेशेन लाघवमिति भावः ॥ नच प्रतियोगिता(वच्छेदक)संबंधेन व्यापकत्वप्रतियोगिसामानाधिकरण्य
स्य घटकाधिकरणत्वयोर्निवेशआवश्यकः तथाच स्वावच्छेदकसंबंधावच्छिन्नसाध्यवद्वृत्तिअभावीयप्रतियोगि
तानवच्छेदकत्वस्वतादात्म्य(उभय)संबंधेनइ तु समानाधिकरणाभावीयप्रतियोगितावच्छिन्नविशिष्टप्रतियोगिताकाभाववत्त्वघटक
पूर्वकल्पे इतु तावच्छेदकसाध्यतावच्छेदकयोः प्रवेशवत् जघन्यकल्पे उक्तोभयसंबंधेन साध्यसमानाधिकरणाभावीयप्रतियोगि
ताविशिष्टप्रतियोगिताकाभावघटकेपि साध्यतावच्छेदकस्याधिकद्विधाप्रवेशात् साध्यतयालाघवान्वकाशइति वाच्यं स्वावच्छि
न्नसामानाधिकरण्यस्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वोभयसंबंधेन साध्यतावच्छेदकविशिष्टाभाववत्त्वभा
वीतावच्छेदकतया तत्र साध्यतावच्छेदकस्य सकृन्निवेशेन लाघवात् तत्र प्रतियोगितावत्त्वं स्वावच्छेदकसंबंधावच्छिन्नत्वस्वावच्छे
दकत्वोभयसंबंधेन बोध्यं ॥ नन्वत्र द्रव्यत्वआत्मत्वोभयाभाव आत्मवृत्तित्वविशिष्टजन्याभावमादाय द्रव्यमात्मत्वादि
त्यादौ अव्याप्तिसंभवे गौरवोत्कीर्तनमसंगतं इति चेन्न प्रतियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविशेषणेन तयोर्वारणा
त् गौरवोत्कीर्तनमिति ध्येयं ॥ ननु धूमवान्वह्नेरित्यादि व्यभिचारिणि अयोगोलकान्यत्वाभावस्य स्वरूपसंबंधे ३
न साध्यसामानाधिकरण्याभावात् तस्य लक्षणाघटकत्वेपि न पटत्वेन वाच्यत्वाभावमादायातिव्याप्तिसंभवे गौरवा

भिधानमसंगतं॥ नच धूमाभाववानयं चेति वाच्यं॥ तस्याव्याप्यवृत्तित्वेन साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात्
इति चेन्न॥ पर्वतवृत्तित्वविशिष्टतदयोगोलकभेदाभावस्य स्वरूपसंबंधेन साध्यसामानाधिकरण्यसंभवात्॥ नन्वत्र प्रति
योगितायाः स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविशेषणं लक्षणाघटकमिति वाच्यं॥ स्वन्यूनवृत्तिधर्मानवच्छिन्नेत्यनेन स्वन्यू
नवृत्तिधर्मावच्छिन्नत्वयत्किंचिद्वृत्त्यधिकरणवृत्तिनावच्छेदकत्वरूपाभायाभाववत्त्वस्य विवक्षणात् तादृशभेदाभावमादाये
वऽतिव्याप्तिव्युदास इति गौरवात्तिद्ध्यावर्तं॥ नच तद्रूपवान् तद्वसात् इत्यत्रातिव्याप्तिः कसूक्ष्मवृत्तित्वविशिष्टतद्घटभे
दाभावस्यैव तथात्वसंभवात् इति वाच्यं॥ प्रतियोगितायाः एवं फलतः यावत्त्वस्य विवक्षणात् इति कल्याभिप्रायकोयं ग्रन्थः॥ एवं पर्व
तवृत्तित्वविशिष्टायोगोलकभेदाभावमादायैव तत्रातिव्याप्तिवारणमिति गौरवं पर्यवसानं धावनमित्याद्यग्रे॥ स्वस्वप्रतियोगिस
मानाधिकेत्यादिजगदीशः॥ अथ यावत्त्वस्य व्यापकत्वार्थकतया केवलसाध्यव्याकेत्यादिविशेषणविशिष्टाभा
वत्वव्यापकं ~~[illegible]~~ अन्यतरत्वस्याखंडोपाधिमते द्रव्यत्वात्मत्वान्यतरत्वेनोभयाभावीयप्रतियोगितायां स्वन्यूनवृत्तित्वेत्यादेः
सत्वेन तस्य लक्षणघटकतया द्रव्यमात्मत्वादित्यादावव्याप्तिरिति चेन्न स्वन्यूनवृत्तिधर्मानवच्छिन्नेत्यनेन स्वन्यूनवृत्ति
धर्मवदन्यप्रतियोगिताकत्वस्य निवेशात्॥ तथा च स्वावच्छिन्नत्व स्वावच्छिन्ननिरूपकतानिरूपितानुयोगितानिरूपितत्वान्यतरसंबं
धेन तादृशाभावीयप्रतियोगितायां उभयत्वावच्छिन्नत्वस्य सत्वे एतादृशोभयत्वावच्छिन्ननिरूपकतानिरूपितोभयाभावत्वरूपानुयो
गितानिरूपितत्वस्य सत्वेन स्वन्यूनवृत्तिधर्मवत्वस्य सत्वेन तदन्यत्वस्यासत्वान्न लक्षणघटकं इति॥ महानसवृत्तित्वविशि

५ द्रूपवत्त्वभेदाभावीयप्रतियोगितायां यत्किंचिद्घटितत्वेनोभयाभावस्य सत्त्वेन तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामा
नाधिकरण्यविरहेण वह्निमान्धूमादित्यादावव्याप्स्यादिदंपिसां ॥ स्वरूपाभावस्ततदेनाक्रांततादृशाभावत्वव्यापकत्वरूपाभा
वस्य भिन्नतया धर्मिणो भेदात्तद्वैयर्थ्यमिति किं न विचारसहमिति चेन्न ॥ तादृशाभावत्वव्यापकत्वस्यैव साध्यसामानाधिकरण्य
विवक्षणात् तादृशाभावत्ववृत्तित्वसाध्यसामानाधिकरण्याभाववद्वृत्तितीयप्रतियोगितानिरूपितपरंपरावच्छेदक
तावत्साध्यसामानाधिकरण्यकालीनहेतुतावच्छेदकवत्त्वरूपार्थकत्वात् ॥ एवं च धर्मिणो ऐक्यात् वैयर्थ्यसंभवः तथा
वत्त्वस्य तादृशाभावत्वस्य च भिन्नतया केवलाभावस्य तादृशसामानाधिकरण्यशून्यवृत्तित्वेन विशिष्टेनास्मिन्
तदभावस्य दुर्घटतया तादृशसामानाधिकरण्ये तादृशाभावत्वव्यापकत्वव्यापकत्वस्याप्रसिद्धत्वादसंभवः स्यादिति वा
च्यं ॥ व्याप्यत्वशरीरे वृत्तित्वस्यावच्छिन्ननिरूपकतावत्त्वसंबंधेनैव विवक्षणात् तादृशविशिष्टधर्मावच्छिन्ननिरूपकता
या केवलाभावत्वावच्छिन्ननिरूपकतावतो विलक्षणतया तादृशाभावत्वस्योक्तसंबंधेन साध्यसामानाधिकरण्यव्या
प्यत्वमक्षतमिति ध्येयं ॥ अन्ये तु यावत्त्वस्य निष्प्रयोजनकतया प्रथमं तस्य परित्यागः ॥ एवं च लक्षणे व्यापक
त्वस्याप्रवेशाद्वैयर्थ्यसंभवइत्याहुः ॥ केचित्तु वैयर्थ्यपदं गगनाद्यभावमादाय योक्ताव्याप्तिवारणरूपप्रयोजनाभावार्थ ५
कमिति नासंगतमिति वदंति ॥ अथास्य व्यभिचारिण्यति व्याप्ति वारकस्य यावत्त्वस्य आत्मत्वसाध्यके अव्या

तिवारकस्यय त्समानाधिकरणेत्यस्य च वैसर्थ्यसंभवे साध्यव्यापकतेत्यैतन्मात्रस्य वैयर्थ्याभिधानमसंगत
मिति चेन्न तयोर्वैयर्थ्योपपादकत्वात् नासंगतं ॥ परे तु कालो मो मग ... त्वादित्यादौ व्यभिचारिण्य
तिवारणाय ... त्वधिकरणावच्छेदेनेत्यपहाय साध्यसामानाधिकरण्यमेव स्वरूपसंबंधेन निवेशनी
नीयं एवं च व्यभिचारिण्यतिव्याप्तिवारणाय यावत्त्वं सद्धेतावव्याप्तिवारणाय यत्सामानाधिकरण्यदलं च सा
र्थकमिति न तयोर्वैयर्थ्यमुक्तमित्याहुः ॥ यदि च यत्समानाधिकरणा इति ॥ ननु वन्हिसंयोगात्यन्ताभावमादायासंभवसं
भवे अव्याप्त्यभिधानमसंगतमित्येन ॥ भावो भेदत्वात् ... तस्य ... णाघटकत्वादिति न च तज्जन्यज्ञानात्मकाभावस्य विष
यित्याद्युक्तसामानाधिकरण्यत्यात्क्षणघटकत्वात् तमादाय तत्रापि अव्याप्तिसंभव इति वाच्यं ॥ विषयतायाव ... नियामकतया
तथाभिधानात् ॥ यद्यपि जात्यात्मकाभावमादायापि वन्हिमान्धूमादित्यादावव्याप्तिसंभवति तथापि प्रतियोगिसामानाधिकरण्यात्ताव
तमादायाप्तिवारणात् तमपहाय वन्हिसंयोगेत्याद्युक्तमिति ध्येयं ॥ अथ तन्तुपात्मकाभावसंयोगात्मकाभावमादायाव्याप्तिसंभवे
वन्हिसंयोगात्यन्ताभावपर्यंतानुधावनमसंगतमिति चेदत्र केचित् वन्हिसंयोगश्चेति ... तच्छूयमाणं पदं प्रत्येकमपि संबध्यत इति
न्यायेन वन्हिसंयोगात्मकाभावयोर्ग्रहण ॥ एवं च तन्तुत्वाभाववन्हिसंयोगाभावाभ्यां चान्यतरायाव्याप्तौ ... कता तात्पर्यमित्याहुः ॥
न च भावभिन्नस्यैवेति ॥ ननु धूमवान्वन्हेरित्यत्राप्रसिद्धव्यभिचारिण्यतिव्याप्तिः संभवति तद्योगोलकान्यत्वाभावस्य तद्योगोलक

४१ त्वस्वरूपतयाभावत्वात् घटत्वादिना वाच्यत्वाभावस्योभयवृत्तित्वात्॥ न च पदापदार्थं तद्घटभिन्नं घटत्वादित्याद्यप्रसिद्धस्थलपर्य
न्तानुधावनमसंगतमिति चेन्न॥ तदयोगोलकीयरूपध्वंसात्मकाभावस्य तादृशाभावभिन्नत्वसंभवात् तस्य चोभयवृत्तित्वविरहेण
नातिव्याप्तिरतस्तत्स्थलपर्यन्तानुधावनं॥ न च तत्रापि तद्घटीयरूपध्वंसात्मकाभावस्य यावद्वर्तमानस्य प्रभावाभिन्नत्वमादायाति
वारणं x व्याप्तिसंभव इति वाच्यं॥ यद्घटीयरूपस्य तद्घटनाशपर्यन्तस्थायित्वात् घटभेदसाध्यकस्थल एवातिव्याप्तिवारणात्॥ तद्
घटीयरूपध्वंसात्मकाभावस्य हेतुसमानाधिकरणत्वेन लक्षणाघटकत्वे अन्याभावस्यैव तथात्वेन तस्योभयवृत्तित्वात्॥ न च तत
त्रापि तद्घटीयप्रागभावात्मकाभावमादायातिव्याप्तिवारणं संभवतीति वाच्यं॥ प्रमाणाभावान् अंगीकरणात्॥ अंगीकारेपि मद्रूपभेदस्य साध्यता साध्य
या रूपवत्त्ववति व्याप्तिः॥ हेतुत्वधिकरणे रूपे रूपादिप्रागभावात्मकध्वंसात्मकाभावयोरसत्त्वात्॥ कालिकादितथात्वेपि वासा
ध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात्॥ न च तत्र तद्रूपान्यप्रकारतानविषयत्वाभावस्यैव तथात्वसंभवः॥ पंचमक्षणस्था
सिरूपभेदस्यैव साध्यत्वात् तत्र प्रथमक्षणे त्रितीयक्षणे पंचमक्षणे च तद्रूपान्यत्वप्रकारकरूपं अन्यत्र च प्रमात्मकमेव तत्प्रकारकं ज्ञानं तत्र त्र x
तादृशाभावस्यैवाप्रसिद्धेः॥ अन्याभावमादायातिव्याप्तिः क्षणिशब्दस्वीकारे कृतभेदसाध्यकस्थल एवातिव्याप्तिर्बोध्या॥
यद्यपि वह्निमान् धूमादित्यादौ तत्पर्वतत्वप्रकारकयत्किंचिज्जन्यज्ञानविषयत्वतत्पर्वतान्यत्वान्यतराभावमादायाव्याप्ति
रेव संभवति॥ न च तादृशाभावीयप्रतियोगितावच्छिन्नाभावस्य ज्ञानशून्यकालावच्छेदेन पर्वत एव हेतुसामानाधिकरण्यत ४१
याव्यापकतावच्छेदकप्रतियोगिताकत्वविरहेण लक्षणाघटक इति वाच्यं॥ तथा सत्यपि तत्पर्वतान्यत्वविशिष्टवाच्यत्वा

घटितजन्यतराभावस्यैव तथात्वात्॥ न च तादृशवाच्यत्व तादृशप्रमाविषयत्वयोर्भेदद्वयावच्छिन्नभेदरूपान्यतरत्वस्य शब्दवा
च्यत्वसाधारणतया तद्रूपावच्छिन्नाभावएव प्रसिद्धिरिति वाच्यं॥ निरूपितसामानाधिकरण्यान्यतरसंबंधेन तत्तद्वत्त्वप्रका
रकयत्किंचित्तज्ज्ञानतत्तद्वत्त्वभेदान्यतरवदन्याभावस्य लक्षणघटकत्वसंभवात् तस्य च तज्जन्यज्ञानशून्यकालावच्छेदेन तत्तद्वत्
सत्वेन तत्तद्वत्त्वानात्मकतया भावभिन्नत्वात् प्रतियोगिसामानाधिकरण्यघटितत्वे धूमवान् वह्नेरित्यादौ धूमसाध्यकाभावस्य ४
४ पूर्वलक्षण वृत्तित्व विशेष स्वाभावात्मकप्रतियोगिनासामानाधिकरण्यतया अतिव्याप्तिवारणाय प्रतियोगितायां प्रतियोगितावच्छेदकाभावे स्वसामानाधिकरण्य
स्यावच्छेदकावच्छिन्नवृत्तित्वं तत्सत्त्वस्वरूपव्याप्यवृत्तित्वनिरूपकत्वनिवेशे भिवए तत्कालेऽपि व्यापकतावच्छेदकप्रतियोगितायांत
न्निवेशेनाव्याप्तिवारणसंभवति इति व्याप्त्यभिधानमिति न चैवं विवक्षणे तत्तद्वत्तीयरूपध्वंसात्मकाभावमादायाव्याप्तिवार
णं साध्यतावच्छेदकप्रतियोगिनेत्यादिविशेषणं व्यर्थं तादृशध्वंसात्मकाभावस्य व्याप्यवृत्तितया तमादायाव्याप्तिवारकतया तत्सा
र्थक्यादिति विभावनीयं॥ ननु हेत्वधिकरणवृत्तित्वं स्वरूपसंबंधेनैव वह्निसंयोगात्मकाभावमादायाव्याप्तिवारणसंभवेऽभा
वभिन्नत्वनिवेशनं निष्प्रयोजनमिति चेन्न स्वरूपसंबंधेन तन्निवेशसूचनार्थमेवाभावभिन्नत्वोपादानात् न निष्प्रयोजकत्वं वस्तु
तस्तु तद्व्यक्त्यन्यत्वविशिष्टवाच्यत्वाभावस्य तद्व्यक्तित्वरूपस्य स्वरूपसंबंधेन हेतुसामानाधिकरण्यतया तमादायाव्याप्तिः
स्यादतस्तदभिधानं॥ न च तदीयप्रतियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविरहेण लक्षणाघटकत्वमिति वाच्यं॥ तत्कल्पे
स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविशेषणस्य प्रयोजनविरहेणानिवेशादिति प्राचां॥ अभावभिन्नत्वस्य साध्यवदवृत्तिभावभि

६ नार्थकस्य निवेशेनातिव्याप्तिवारणं संभवति॥ न च कालिकसंबंधेन तद्घटान्यत्वाभावस्यापि साध्यवद्वृत्तीति तया लक्षणाव्या
कत्वेनोक्तदिशा तत्रैवातिव्याप्तिरिति वाच्यं। स्वरूपसंबंधेन साध्यवद्वृत्तित्वनिवेशान्न दोषः॥ न चैवं वह्निसंयोगाद्यात्मका
भावमादायाव्याप्तिः तदवस्थैवेति वाच्यं। वह्न्यधिकरणवृत्तित्वस्यापि स्वरूपेण निवेशात् न तानादायाव्याप्तिरिति चेन्न॥=गगना
भावभिन्नं अभावत्वादित्यत्र गगनाभावभेदाभावस्याभावप्रतियोगिताकतया गगनाभावस्वरूपत्वे तस्य दैशिकविशेषणतया
भयवत्तित्वेनातिव्याप्तिः॥ अतः तेन संयोगसमवायस्वरूपविषयत्वान्यतमसंबंधेन भावभिन्नगर्भसाध्यवद्वृत्तित्वनिवेशेनैव वह्नि
संयोगाद्यात्मकाभावमादायाव्याप्तिवारणमित्यपास्तं॥=गगनाभावभिन्नं अभावत्वादित्यत्रैवातिव्याप्तिः॥ तद्घटभि
न्नं घटत्वादित्यत्रापि साध्याभावस्य तत्तदन्यतमसंबंधेन प्रतिविशेष्यतासाध्यवद्वृत्तिभावतया तदन्यत्वविरहेण लक्षणाघ
कतयातिव्याप्तेश्च॥१३॥ न च स्वमतेपि जात्यात्मकाभावमादायासंभववारणाय भावभिन्नत्वं निवेशनीयं॥=एवं च तद्घट
भिन्नं घटत्वादित्यत्र तद्घटान्यत्वाद्यभावानां भावभिन्नत्वविरहेण लक्षणाघटकतया घटत्वादिना तादृशाभावस्यैव तथा
त्वेन तस्य च वाच्यत्वादिरूपप्रतियोगिसामानाधिकरण्यादिति व्याप्तिः॥ न च भावभिन्नत्वपदस्य साध्यवद्वृत्तिभावप्रतियोगि
प्रतियोगिकान्यत्वार्थकतया तत्र तद्घटान्यत्वाभावस्यैव तथात्वेन नातिव्याप्तिरिति वाच्यं॥ तद्घटान्यत्वाभावस्यापि का ६
लिकसंबंधेन साध्यवद्वृत्तिभावतया तस्य तथात्वेनातिव्याप्तितादवस्थ्यं॥ न च तत्र स्वरूपसंबंधेनैव साध्यवद्वृत्तित्वं निवे
शनीयं॥=जात्यात्मकाभावमादायासंभवस्य दुरुद्धरत्वात्॥ न च स्वप्रतियोगितावच्छेदकसंबंधेन स्वप्रतियोगिमत्त्व

बुद्धेर्विषयविषयविरोधितावच्छेदकसंबंधेन साध्यवद्वृत्तित्वनिवेशान्न दोष इति वाच्यं ॥ तथा सति तेन संबंधेन साध्यव्याप्य
कत्वदशायामेव साध्यवद्वृत्तित्वनिवेशेनैवोपदर्शितासंभवव्युदासात् तदभाववद्भिन्नत्वदलस्य वैयर्थ्यापातात् कथंचित् स्वरूपसंबंधाभा
वघटकतया सार्थकीकृत्य तादृशलक्षणमुपादाने उभयवत्तित्वकल्पितादृशाभाववद्भिन्नत्वं निवेश्य तद्घटभिन्नं घटत्वादि
तद्वत्तित्वादिव्याप्तिवारयितुं शक्यत इति चेत् ॥ वक्ष्यमाणस्वन्यूनवृत्तिधर्मानवच्छिन्नत्वमित्यस्य स्वन्यूनवृत्तिधर्मानवच्छिन्न
साध्यवत्त्वप्रकारकप्रमाविशेष्यतानवच्छिन्नत्वोभयाभाववत्त्वमित्यर्थः ॥ भाववद्भिन्नत्वं च यथाश्रुतमेव ॥ एवं च स्वमते तद्
घभिन्नं घटत्वादित्यत्र पटवृत्तित्वविशिष्टतद्घभेदप्रकारकप्रमाविशेष्यत्वाभावस्यैव भाववद्भिन्नत्वसंभवात् तमादायैवा
तिव्याप्तिवारणं संभवति ॥ उभयवत्तित्वकल्पे तादृशाभावस्योक्तसंबंधेन उभयवत्तित्वेनातिव्याप्तिस्तादवस्थ्यात् ॥ न च स्वमते विषय
तात्वेन पटवृत्तित्वविशिष्टविषयत्वाभावः पटवृत्तित्वविशिष्टतादृशप्रमाविशेष्यत्वाभावयोः समनीयतत्वेनैक्यतया
तादृशप्रमाविशेष्यत्वाभावस्य स्वीयशुद्धविषयतात्वावच्छिन्नप्रतियोगितासामानाधिकरण्यमिति व्याप्तिरिति वाच्यं ॥ प्रति
योगितायां स्वन्यूनवृत्तिधर्मवत्त्वं तादृशप्रमाविशेष्यतानवच्छिन्नत्वोभयाभावस्यैव निवेशात् स्वन्यूनवृत्तिधर्मवत्त्वं च स्वावच्छि
न्नत्वस्वावच्छिन्नानिरूपकतानिरूपितानुयोगितानिरूपितत्वान्यतरसंबंधेन तथा च शुद्धविषयतात्वावच्छिन्नपटवृत्तित्ववि
शिष्टविषयतात्वावच्छिन्नप्रतियोगिताया अतथात्वेन न तमादायातिव्याप्तिसंभवः ॥ न च तथापि पटवृत्तित्वविशिष्टत्वावच्छिन्नत्व
तद्घटभेदप्रकारकप्रमाविशेष्यत्वोभयाभावपटवृत्तित्वविशिष्टतादृशप्रमाविशेष्यत्वाभावयोः समनीयतत्वेनाता

दृशप्रमाविशेष्यत्वाभावीयतादृशोभयप्रतियोगितायाः अपि उक्तस्वन्यूनवृत्तिधर्मावच्छिन्नत्वेन तादृशतामादाय तत्रैवाति
व्याप्तिर्दुर्वारा इति वाच्यं ॥ स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वमनेन स्वन्यूनवृत्तिधर्मवत्त्वसाध्यवत्त्वप्रकारकप्रमाविशेष्यतात्वाति
रिक्तवृत्तित्वोभयाभाववत्त्वस्य विवक्षणात् ॥ तादृशोभयाभावीयप्रतियोगितायाः स्वन्यूनवृत्तिधर्मवत्त्वतादृशविशेष्यता
त्वातिरिक्तवृत्तित्वोभयोरसत्त्वेन तदभाववत्त्वविरहान्न तमादायातिव्याप्तिरिति ॥ अथात्र येन येन संबन्धेन हेत्वधिकरणवृ
त्तित्वं तेन साध्यवद्वृत्तित्वं उभयवृत्तित्वं च तेनैव निवेशनीयं ॥ तेन वह्निमान् धूमादित्यादौ वह्निसंयोगाद्यात्मकाभा
वस्य समवायेन हेत्वधिकरणवृत्तित्वेन तेन साध्यवद्वृत्तित्वेन साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वविरहेण त
मादायाव्याप्तिव्युदासः तद्घट[illegible]लंघत्वादित्यादौ सर्वयेन तद्घटकेदाभावस्य हेत्वधिकरणवृत्तित्वेन तेन संबन्धेन साध्य
वद्वृत्तित्वविरहेण साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वेन च समवायेन तर्मततया तस्य तेन संबन्धेनोभयवृत्तित्वविरहेणा
तिव्याप्तिवारणं संभवतीति किमेतत्कल्पं परित्यज्य गुरुतरस्वस्वप्रतियोगित्वघटितनिरुक्त्या ॥ न च यथाश्रुततद्घटितत्वेनान
नुगमता ॥ पुनस्तुल्य एवेति वाच्यं ॥ हेत्वधिकरणवृत्तिताविशिष्टवृत्तिता च व्यापकभेदकातीनहेतुतावच्छेदकत्वेन समुदाय
लक्षणस्यानुगमसंभवात् ॥ वृत्तितायां वृत्तित्वविशिष्टत्वं च स्वतादात्म्यस्वावच्छेदकसंबन्धावच्छिन्नसाध्यवद्वृत्तित्ववदभावीयप्रतियोगितानवच्छे
दकप्रतियोगिताकाभावत्वानवच्छिन्नत्वोभयसंबन्धेन तादृशप्रतियोगिताव्यापकत्वं च नेदस्य अनुयोगित्ववत्त्वसंबन्धेन प्रतियोगितावत्त्वोभयसंबन्धेन २
तत्र वृत्तित्ववत्त्वद्वयं स्वावच्छेदकसंबन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसंबन्धेन ॥ न च येदं वाच्यं ज्ञेयत्वादित्यादौ घटत्वेन वाच्यत्वाभावस्या
पि हेत्वधिकरणतया ॥ तस्यस्यैव तादृशनवृत्तितया यावदंतर्गततया तस्य च तेन संबन्धेनोभयवृत्तित्वविरहेण अव्याप्तिरिति वाच्यं ॥ उभयनिरूपितैकवि

घ्यतावच्छेदकसंबंधेनहेत्वधिकरणवृत्तित्वनिवेशात्॥ तादात्म्येन॥ कणादार्थस्योभयवृत्तित्वविरहेणतत्संबंधावच्छिन्नहेत्वधिकरणवृत्तित्व
विरहेणाव्याप्तिरुद्धारसहेतोश्चेन्न॥ गगनाभावत्वादिसत्त्वातिव्याप्तिः गगनाभावभेदाभावस्यगगनाभावस्वरूपतयास्वरूपसंबं
धेनहेतुसमानाधिकरणेत्यादिविशेषेजपाकान्तस्यसाध्यतावच्छेदकस्य तस्य तेनसंबंधेनउभयवृत्तित्वात्॥ नचस्वप्रतियोगिसामान्यनाधिकर
ण्यघटितकल्पेपिगगनाभावस्वरूपतयासाध्याभावस्यघटत्वेनवाच्यत्वाभावस्यचसमनीयततुनैक्यन्नमातस्यचवाच्यत्वस्वरूपप्रतियोगि
सामानाधिकरण्यात्तत्रातिव्याप्तिरितिवाच्यं॥ प्रतियोगिसामानाधिकरण्यमित्यत्रसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छि
न्नप्रतियोगिताकाभावीयत्वव्यधिकरणधर्मावच्छिन्नत्वोभयाभाववत्प्रतियोगिताश्रयसामानाधिकरण्यविवक्षणात्॥ वाच्यत्व
निष्ठप्रतियोगितायाअतथात्वेनगगनाभावभेदनिष्ठप्रतियोगितायाएवतथात्वेनतदाश्रयसामानाधिकरण्यविरहान्नातिव्याप्तिः नचगगनवा
च्यत्वोभयाभावस्यापितादृशसाध्याभावसमनीतत्वेतादृशोभयत्वावच्छिन्नप्रतियोगितापितादृशोभयाभाववत्त्वेतामादायातिव्याप्तिस्ता
त्रैदुर्वारीतिवाच्यं॥ जगद्वृत्तितावच्छेदकीभूतानुयोगितानिरूपितावघटितोभयाभावविवक्षणान्नतादृशोभयत्वावच्छिन्नप्रतियोगिता
यास्तथात्वं॥ नचैवंवाच्यंज्ञेयत्वादिसाध्यकेसाध्यतावच्छेदकसंबंधधर्मावच्छिन्नाभावस्याप्रसिध्याव्याप्तिरितिवाच्यं॥ स्वावच्छिन्नसा
ध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावीयत्वस्वकालीनजगद्वृत्तितावच्छेदकानुयोगितानिरूपितत्वोभयसंबंधेनसाध्यता
वच्छेदकाभाववत्त्वमेवविवक्षणान्नातिव्याप्तिः॥ नचतथापिवृत्त्यनियामकसंबंधेनसाध्यतायांतत्संबंधावच्छिन्नप्रतियोगि
त्वाप्रसिध्यातादृशसंसर्गाप्रसिद्धिरितिवाच्यं॥ स्वावच्छिन्नसाध्यतावच्छेदकावच्छिन्नत्वघटितोभयसंबंधसाध्यतावच्छेदकसंबंधाभाव
वृत्तित्वस्यविवक्षणात्॥ नचैवमपिगुरुधर्मेणसाध्यतायांस्वाधिकरणतावत्त्वसंबंधेनगगनाभावभेदस्यसाध्यतायांमस
द्धेतौव्यभिचारिण्यतिव्याप्तिरापत्तेः॥ सद्धेतौसाध्यतावच्छेदकावच्छिन्नत्वाघटितसंबंधाप्रसिद्धेःव्यभिचारिणिचस्वा

वच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽन्यसंबंधावच्छिन्नप्रतियोगिताघटितोभयसंबंधेन वाच्यत्वनिष्ठप्रतियोगितायां साध्यता
वच्छेदकसंबंधावच्छिन्नत्वस्य सत्त्वादिति वाच्यं। स्वरूपसंबंधावच्छिन्नस्वावच्छिन्नप्रतियोगिताकाभावीयत्वस्वकालीन
जगद्वृत्तितावच्छेदकानुयोगितानिरूपितत्वोभयसंबंधेन साध्यवत्त्वप्रकारकप्रमाविशेष्यतात्वाभाववत्त्वस्य प्रतियोगितायां
विवक्षणम्ये पूर्वोक्तस्थले सुगमतया व्याप्तेरतिव्याप्तिरिति। न चोभयवत्त्वे निरुक्तघटितकल्पेपि तादृशवृत्तितात्वव्यापक
त्वव्यापकत्वभेदस्य स्वानुयोगिकवृत्तितावत्त्वप्रतियोगिवृत्तितावत्त्वोभयसंबंधेन विवक्षणीयं। तथा च वृत्तितावत्त्व
द्वयमपि स्वावच्छेदकसंबंधावच्छिन्नस्वावच्छेदकधर्मावच्छिन्नत्वोभयसंबंधेन। एवं च तादृशवृत्तितायां घटादी
नां कस्यापि भेदस्यापि भेदस्योभयसंबंधेनासत्त्वान्नातिव्याप्तिरिति वाच्यं। तथासति इदं वाच्यं ज्ञेयत्वादित्या
दौ उभयनिरूपितैकपदार्थनिष्ठतादात्म्यसमवायान्यतरसंबंधावच्छिन्नवृत्तितावच्छेदकसंबंधावच्छिन्नत्वाधिक
रणघटत्वे वाच्यत्वाभावनिरूपितवृत्तितायामपि तादृशवृत्तितात्वेन तत्र चोक्तोभयसंबंधेन कस्यापि भेदस्या
सत्त्वेनाव्याप्तिर्दुर्वारैवेत्याहुः। साध्येत्यादि। साध्यतावच्छेदकावच्छिन्नेति जगदीशः। नन्वप्रमगुणत्वा
भावस्यैव लक्षणघटकत्वसंभवेन तस्यानतिव्याप्तिः। न च तस्य साध्यवद्वृत्तित्वाभावप्रतियोगित्वोल्लेखार्थकमात्रभिन्नत्व
सम्भवात्। न च सामान्यवृत्तित्वविशिष्टवाच्यत्वस्य साध्यतायां सामान्यसमवायान्यतमसंबंधेन तत्त्वे व्यभिचारिण्यति
व्याप्तिरिति वाच्यं। तत्र तज्ज्ञानाज्ञानावस्थैव तत्त्वाभावसंभवादिति चेन्न गमनाज्ञानवृत्तित्वविशिष्टवाच्यत्वज्ञानानुत्पादाद्वा
सत्त्वातिव्याप्तिः। घटादिभेदाभावस्य इदंत्वसमानाधिकरण्यतया लक्षणाघटकतया घटत्वेन वाच्यत्वाभावस्यैव तत्त्वात्तदप्र

तियोगिसामानाधिकरण्यात् साध्यतावच्छेदकावच्छिन्नेत्युक्तं ॥ नच तत्रापि घटाभावविषयकत्वान्यत्वात्मकाभावस्य निरुक्तयान
द्वंतर्गततयासम्भवात्तथात्वेनातिव्याप्तिवारणं संभवतीति वाच्यं ॥ तस्या अभावमात्रानुयोगिताकत्वेन घटाभावस्वरूपतया साध्य
व्यापकतावच्छेदकप्रतियोगिताकत्वविरहात् ॥ वस्तुतस्तु भावभिन्नत्वं यथाश्रुतार्थकत्वे न विशिष्टसत्तावान् जातेरित्यत्रातिव्या
प्तिरतस्तन्निवेशनमिति ध्येयं ॥ इदं च यत्संबंधेन स्वावच्छिन्नानधिकरणेति जगदीशः ॥ संबंधवत्वमिति तदर्थः ॥ इदं त्वं च स्वा
वच्छिन्नाधेयताकत्वस्वावच्छिन्नत्वस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वा एतत्रितयसंबंधेन स्वनिष्ठावच्छेदकत्वं च अनु
योगितावृत्तिउभयावृत्तिधर्मनिष्ठनिरवच्छिन्नावच्छेदकताकनिरूपितानुयोगितानिष्ठावच्छेदकतानिरूपितावच्छेदकत्वसं
बंधावच्छिन्नावच्छेदकतानिरूपितत्वविशिष्टावच्छेदकतावत्वसंबंधेन ॥ अवच्छेदकतावत्वं च ॥ स्वनिरूपितावच्छिन्नत्वसंबंधाव
च्छिन्नावच्छेदकतावत्वस्वविशिष्टप्रतियोगिताकभेदवत्साध्यवद्वृत्ति अभावीयप्रतियोगितावच्छेदकत्वोभयसंबंधेन प्रति
योगितात्वावच्छिन्नसंबंधावच्छिन्नावच्छेदकताया नाहश अवच्छेदकतावैशिष्ट्यं स्वनिरूपिताधिकरणतानिष्ठावच्छे
दकताकत्वस्वनिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्य वृत्ति अवच्छेदकता
निरूपकाधिकरणत्वनिष्ठावच्छेदकतानिरूपकनिरूप्यतानिरूपितानुयोगितानिरूपितत्वोभयसंबंधेनेति ध्येयं ॥
अथात्र स्वावच्छिन्नानधिकरणसाध्यवत्कं यन्न सत्त्वं तन्न्योमोभयः इत्यनेनैवोपपत्तौ साध्यवद्वृत्त्यभावप्रतियोगिताव
च्छेदकत्वस्यास्मिन्निवेशितगौरवग्रस्तं ॥ न च गुरुधर्माणां प्रतिपादकत्वस्यान्तर्गततया तत्तद्भेदः ॥ घादितगुरुतरकू
टनिवेशे गौरवं त्वत्यसाम्येव स्यादिति तन्निवेशनं ॥ तथा सति गुरुधर्माणाभावप्रतियोगितावच्छेदकत्वविरहेण स्वप

६ देनघटत्वस्य शक्यत्वेन तेषां भेदस्य कूटगर्भेऽपि निवेशेन न लाघवमिति वाच्यं ॥ गुरुधर्मस्याभावप्रतियोगितावच्छेदकपरि-
रणे वराद्रक्षणकरणात् ॥ गुरुधर्मस्य तद्धर्मताभिप्रायेण कत्वेन घटाभावप्रतियोगितायाऽपि घटत्वापेक्षया गुरुत्वेन स्वप-
देन घटत्वं शक्यतया तादृशप्रतियोगिताभेदकूटवत्त्वेन व्यापकतावच्छेदकत्वेन तन्निरूपकाभावस्यापि यावदन्तर्गततया तस्य
स्वविशिष्टे त्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहादसंभवः स्यात् ॥ एवं च गुरुधर्मस्यापि स्वपदेन घटत्व-
शक्यतया तद्भेदस्यापि तादृशकूटघटकत्वमावश्यकं ॥ तथा च तादृशाभावप्रतियोगितावच्छेदकत्वनिवेशनमनर्थकमि-
ति चेदत्र केचित् ॥ व्यापकतावच्छेदकपदस्य किंचिन्निष्ठाभावप्रतियोगितावच्छेदकरूपार्थतावच्छेदकत्वेति शक्यार्थानुरो-
धेन तदुपादानं स्यात् ॥ अन्यथा तादृशपदस्य पारिभाषिकत्वापत्तिरिति वदन्ति ॥ अखंडाभावघटकतया सार्थक्य[illegible]कादि-
ति केचित् ॥ ननु लाघवेन स्वावच्छेदक[illegible]ताकप्रतियोगिताकभेदस्य साध्यवन्निवेशेनैव कृतकृत्यतया किं गुरुतरतादृ-
शाधिकरणतावच्छेदकनिवेशनेनेति चेदत्र केचित् ॥ तादृशसाध्यवति तादृशभेदवत्त्वस्य स्वरूपसंबंधेन निवेशनीय-
त्वाद्धूमाभावीयप्रतियोगितावच्छिन्नभेदस्यापि धूमवति सत्त्वेन तस्यापि स्वपदेन घटत्वशक्यतया तन्निरूपकाभावस्य
लक्षणघटकत्वेन घटत्वेन वाच्यत्वाभावस्यैव तथात्वादतिव्याप्तिः ॥ एवं च स्वाभावभेदस्य स्वस्वरूपतया जात्यात्म-
काभावीयप्रतियोगितायाः स्वपदेनोपात्तशक्यतया जात्यात्मकाभावस्यापि यावदन्तर्गततया तस्य स्वविशिष्टे त्वधिकरणा-
वच्छेदेन प्रतियोगिसामानाधिकरण्यविरहादसंभवः स्यादतस्तन्निवेशनं ॥ तथा सति जात्यात्मकाभावीयप्रतियोगिता ६

वच्छिन्नोऽधिकरणतावच्छेदकव्यातिरिक्तनयाजात्यधिकरणतास्वरूपतयास्वरूपेणाधिकरणत्वाप्रसिध्या तादृशभेद
स्य नासंभवः ॥ वस्तुतः साध्यवन्निष्ठाभावस्य तत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनेत्यादिज
गदीशः गदीशः ॥ श्री ॥ यावन्मात्राकाशत्वादिलक्षणस्य प्रकृतपक्षे घटाभावस्यापि तादृशयावदंतर्गतत्वेन तस्य स्वविशिष्टेऽत्वधिक
रणावच्छेदेन रणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्तिवारणसंभवे स्वरूपेण तन्निवेशनं निष्प्रयोजनकमिति चेन्न
क्रियातिरिक्त क्रियातिरिक्तजात्यस्य कालिकत्वात् अभ्युपगंतृमतनिपायेनैव तथाभिधानात् ॥ नन्वेतत्पक्षयस्मदंत्वधिकरणत्ववि
रहेण क्रियाका रहेण क्रियाकालयोरेव तत्त्वेन तमादाय व्याप्तिनाति व्याप्तिरसङ्गा पदं साध्यतावच्छेदकावच्छिन्नसमाना
धिकरणाद्या धिकरणाद्यवृत्तित्वधर्मान्तरव्याप्येऽन्तरीति जगदीशः ॥ अथ साध्याधिकरणवृत्तित्व साध्यतावच्छेदकसंबंधेन तेनैव प्रति
योगित्वं तेन प्रतियोग्यधिकरणत्वं साध्यतावच्छेदकावच्छिन्नवान्निरूपितवृत्तितावच्छिन्नानुयोगिताकप्रतियोगि
कत्वावच्छिन्नविशिष्टप्रतियोगिताकाभाववृत्त्यभावान्तर्योनिष्कर्षः ॥ प्रतियोगितायां कुत्रचित्तं च स्वावच्छेदकसंबं
धावच्छिन्नत्वसाध्याधिकरणवृत्तित्वोभयसंबंधेनेति बोध्यं ॥ वस्तुतः साध्यवदवृत्त्यभावप्रतियोगितावच्छेदकेत्यादिजग
दीशः ॥ अथासत्त्वलक्षणे वन्हिमान् धूमादित्यादावेव घटाभावस्यापि स्वरूपसंबंधेन साध्यवद्वृत्तिघटाभावत्वात्मका
भावरूपानुयोगितानिरूपितप्रतियोगितावच्छेदकप्रतियोगिताकसाध्यवदगतत्वेन तस्य स्वविशिष्टेऽत्वधिकरणावच्छे
देन प्रतियोग्यसमानाधिकरण्यादव्याप्तिसंभवे केवलान्वयिन्याभावाप्रसिद्धेर्निबंधनाव्याप्तिदूषणमसंगतं ॥

न च साध्यवद्वृत्ति अभावनिरूपितप्रतियोगिताऽनवच्छेदकप्रतियोगिताकत्वं विवक्षणीयं तथापि तस्य घटाभावस्यातद्घटत्वेन
रूपेण घटकतया नाव्याप्तिः अतस्तात्पर्यन्तानुधावनं भिगिवाच्यं॥ तथापि घटभिन्नघटत्वादित्यादौ साध्य
वद्वृत्तिघटत्वादौ वह्न्यभावनिरूपितन सर्वासां प्रतियोगितानां तादृशाभावनिरूपितप्रतियोगित्वाप्रसिद्ध्या
अव्याप्तिरिति चेन्न। साध्यवद्वृत्तिनावच्छेदकानुयोगिताविशिष्टान्यप्रतियोगितावच्छेदकप्रतियोगिताकेत्यर्थक
त्वात्। अनुयोगिताविशिष्ट्यं च स्वनिरूपितत्वस्वनिष्ठानुयोगितानिरूपितत्वोभयसंबंधेन। एवं च घटादिनिष्ठप्र
तियोगितस्य साध्यवद्वृत्तिनावच्छेदकघटाभावत्वरूपानुयोगिताविशिष्टतया तन्निरूपिकाभावस्य लक्ष
णाघटकतया तस्य प्रतियोग्यसमानाधिकरण्याभावात् नाव्याप्तिरिति ध्येयं॥ ननु केवलान्वयिसाध्यके सर्वघटत्वेद
न केवलान्वयिनामभावस्य केवलान्वयित्वेन तस्यैव हेतुसमानाधिकरणतया तत्प्रतियोगित्वावच्छिन्नाभाव
स्य साध्यवद्वृत्तित्वेन तत्प्रतियोगितानवच्छेदकप्रतियोगिताकत्वमाघटकतया तमादाय लक्षणगमनसंभवे
नन्वेव्या नायानुद्धृषणप्रसंगाभिप्रायेणेदं च केचित् घटत्वेन गगनाभावाभावीयप्रतियोगित्वावच्छिन्नाभा

वानगीक्रियते॥ अभावविरहात्मत्वमितिसिद्धांतनिरोधस्य तद्गगनाभावत्वावच्छिन्नाभावस्विकारादेवनिव
निरितिताद्दृशाभावस्यसाध्यवद्वृत्त्येत्यादिविशेषणानाक्रांततया लक्षणापटकत्वेनमाधायलक्षणगमकं
भवतिइत्यभिप्रायः॥ नचगगनाभावाभावप्रतियोगित्वावच्छिन्नाभावस्याप्रसिद्ध्यातस्यसाध्यवद्वृत्तित्वाभि
धानमसंगतमितिवाच्यं॥ सामान्याभावप्रतियोगितायाःप्रतियोगितावच्छेदकरूपावच्छिन्नतयातादृक्प्रति
योगितायागगनाभावाभावरूपतया गगनाभावाभावस्विकर्तुंताद्दृशप्रतियोगित्वावच्छिन्नाभावस्विकारा
वश्यकतयातस्यतत्वाभिधानंग्रंथकर्तोयुक्तमेव॥ नचसामान्याभावीयप्रतियोगितायाःप्रतियोगितावच्छे
दकरूपत्वे घटत्वेनवह्न्यभावीयप्रतियोगितावन्नास्तित्यभावीयप्रतियोगितायाघटत्वेनवह्न्यभावीय
प्रतियोगिरूपत्वात् साध्यवद्वृत्त्यभावप्रतियोगिताकाभावाइत्येवनकृत्स्नचिंतामितिघटत्वादि नानात्वादीनामपि
मेयवान्नास्तीतिसिद्धाभावप्रतियोगितारूपतयाघटाभावस्यापिसाध्यवद्वृत्तिप्रमेयावच्छिन्ना
भावीयघटत्वरूपप्रतियोगिताकतयातस्यस्वाविशिष्टकेवलाधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्यविर
हाद्वह्निमान्धूमादित्यादावव्या[illegible] तत्प्रतियोगितावच्छेदकप्रतियोगिताकत्वपर्यंतानुधावनं॥
एवंचसाध्यवद्वृत्त्यभावप्रतियोगितानिरूपितकिंचिदनुयोगितानिरूपितप्रतियोगितात्वावच्छिन्ननिष्ठावच्छेदकतानिरू

पितावच्छेदकतानुयोगिताकाभाववादित्यर्थः अभावत्वघटाभावस्यैव तत्त्वेन नाव्याप्तिरिति ध्येयं॥ ननु साध्यतावच्छेदकाव्यापकप्रतियो
गिताकेत्यादि जगदीशः॥ पृथ्वीपितत्वमनोभिन्नत्वमेदस्यापि निरुक्तभावव्दं तर्मततमप्रतियोगितावच्छेदकतादात्म्यसंबंधेन
प्रविशिष्टकेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः संभवति॥ तथापि वन्हिमान् धूमादित्या
दौपर्वतभिन्नमेदमादायाव्याप्तिवारणाय साध्यतावच्छेदकसंबंधेन प्रतियोगिसामानाधिकरण्यघटकप्रतियोग्यधिकर
णत्वं निवेशनीयं॥ तथा च तत्र साध्यतावच्छेदकसमवायसंबंधेन मनोभेदस्य प्रतियोगिसामानाधिकरण्यघटकप्रतियोग्यधिकर
णत्वस्य चक्रासंभवति॥ २२॥ यत्तु साध्यनिष्ठप्रतियोगिताकोयः कश्चिदभाव इत्यादि जगदीशः॥ ननु तत्र साध्येतरावृत्ति
प्रतियोगिताकाभावो न चैव॥ दृशाभावत्वं दुस्संकर्ति॥ न च तादृशप्रतियोगितायाः प्रतियोगिस्वरूपत्वमतेऽधमत्वरूपप्रतियोगि
तायाः साध्येतरावृत्तित्वेन तादृशाभमाभावस्य दुस्संदवीरिमैवेति वाच्यं॥ स्वनिरूपितप्रतियोगित्वसंबंधेन साध्येतरावृत्ति
अभावस्यैव लक्षणे निवेशात्॥ तादृशाभावस्य तथात्वेन तमादायातिव्याप्तिः॥ न चैवं घटत्वेन वाच्यत्वाद्यभावस्य
घटत्वादिकापधाभावस्वरूपतया तस्योक्तसंबंधेन वाच्यत्वेतरघटादिवृत्तित्वेन तु अविधाभावाप्रसिध्या अव्याप्तिः वांच्यंडे
यत्वादित्यादावेति वाच्यं॥ =उक्तसंबंधेन साध्येतरावृत्त्यभावानुयोगिताकाभावस्यैव लक्षणे प्रवेशात्॥ -घटत्वादिना वाच्य
त्वाभावत्वरूपानुयोगितायाश्च तथात्वसंभवात् दोषः॥ इच्च तादात्म्येन प्रमेयसाध्यके साध्येतराप्रसिध्यादव्याप्तिरिति वाच्यं
स्वतादात्म्यस्वनिरूपितसाध्येतरावृत्तित्वोभयसंबंधेनानुयोगिताविशिष्टानुयोगिताकाभावः प्रतियोगितावच्छेदक

संबंधेन प्रतियोगिसमानाधिकरणस्तात्वमितिलक्षणकरणात्॥ तत्रापि घटत्वादिना वाच्यत्वाभावमादाय लक्षण
गमनसंभवादिति चेन्न तादृशानुयोगिताकस्य घटत्वेन कालिकसंबंधावच्छिन्नप्रतियोगिताकधूमाभावप्रतियोगि
तावच्छेदककालिकसंबंधेन प्रतियोगिसामानाधिकरण्यादिति व्याप्तिः॥ साध्यतावच्छेदकसंबंधावच्छिन्नता
दृशप्रतियोगिताकाभावनिवेशे तादात्म्येन प्रमेयसाध्यके व्याप्तिर्दुर्वारैवेति ध्येयं॥ न्यायरूपितादृशाभाव
स्यप्रतियोगिताव्यापकं साध्यतावच्छेदकमित्यादि जागदीशलक्षणे यद्यपि भूतत्वमूर्तत्वोभयरूप तदवच्छिन्न[illegible]प्रतियोगिताव्या
पकत्वस्याऽसंभवेन लक्षणाघटकत्वात् तमादाय पातिव्याप्त्यसंभवेऽपि दोषेण तन्मतनिराकरणसंभवेऽप्यन्यथा तन्मतनिराक
रणं न संदर्भशुद्धं॥ तत्रापि समवायेनोभयत्वसाध्यतावच्छेदकं मूर्तत्वसंदेहे रैवेति वाच्यं॥ समवायेनोभयत्वविशिष्टस्य संतोऽन्य

वह्नेः साध्यत्वे वह्नित्वस्य हेतुतायां साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकं यत् वह्नित्वनि
ष्ठावच्छेदकत्वं तदधिकरणे वह्नित्वस्य वृत्तेरव्याप्तिरतो व्यापकपदनिवेशः ॥ आधेयत्वस्य संसर्गस्यिकारो त्वान्न च सर्वत्र तु
त्तसंबंधावच्छिन्नवृत्तित्वतत्संबंधनिरूपितप्रतियोगित्वयोरैक्यात् साध्यतावच्छेदकसंबंधप्रमादायाव्याप्तिरिति वाच्यम् ॥
निरुक्तसंबंधावच्छिन्नाधिकरणप्रसिद्धेरिति ध्येयं न च प्रतियोगितानिरूपितत्वं अवच्छेदकतायां वर्तते न तु निरूपकत्वं ॥
तथा चाभावपदानुपादाने उक्तस्थले कथमव्याप्तिरिति वाच्यं ॥ उक्तस्थले अव्याप्तिविरहेऽपि यत्राभावानुयोगिकस्वरू
पसंबंधेनाधिकरणस्य साध्यता तादृशसंबंधावच्छिन्नप्रतियोगिताधिकरणत्वाभावस्य हेतुता तत्राव्याप्तेः साध्यतावच्छेदकसं
बंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितानिरूपकं यदनुयोगित्वं तदधिकरणे हेतोर्वृत्तेरिति ध्येयं ॥ न च साध्य
वह्नित्वसाध्याभाववदवृत्तित्वमिति ॥ मार्गरि॥ न च साध्याभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्
छिन्नप्रतियोगिताकत्वे ध्यमः ॥ तेन त्र व्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्य साध्यत्वे कालत्वादिहेतौ साध्यतावच्छेदकसं
बंधेन साध्यवह्निनोगगनादौ स्वरूपसंबंधेन तादृशप्रमाविशेष्यत्वरूपसाध्याभावस्य कालेसत्त्वेऽपि नाव्याप्तिः तत्
स्वरूपेण घटाधिकरणत्वाभावस्य साध्यत्वे पटत्वादिहेतौ साध्यवह्नित्वे वर्तमानेस्वरूपेण द्रव्यत्वाभावाभावस्य
द्रव्यत्वस्वरूपस्याधिकरणे पटे पटत्वहेतौ सत्त्वाद्व्याप्तिवारणाय साध्यनिष्ठेति ॥ - ॥ श्रीः

೧೨

ನಂ. ೭೧೪

ಸಿದ್ಧ ಲಿಂಗೇಶ್ವರ ಪುರಾಣ

(ಶೀರವಸಾಗರದ ಚೆನ್ನಮಲ್ಲಕವಿ)

ಎಲವಸಗಾಉಪೃದ (ಲ) ಸಿದ್ಧಲಿಂಗ ಸ್ವಾಮಿ

ಗಳಿಂದ ಪಡೆಯಲ್ಪಟ್ಟಿತು 20/12/43

oh-d